## तत्र तस्येव । (११६/१७७९)

तत्र इति सप्तमीसमर्थात् तस्य इति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति । मथुरायामिव मथुरावत् स्रुघ्ने [1]प्राकारः । पाटलिपुत्रवत् साकेते परिखा । षष्ठीसमर्थात् – देवदत्तस्य इव देवदत्तवत् यज्ञदत्तस्य [2]गावः । [3]यज्ञदत्तस्य इव यज्ञदत्तवत् देवदत्तस्य दन्ताः[4] ॥

## तदर्हम् । (११७/१७८०)

तत् इति द्वितीयासमर्थात् [5]अर्हम् इत्येतस्मिन्नर्थे वतिः प्रत्ययो भवति । राजानमर्हति राजवत् [6]पालनम् । [7]ब्राह्मणवत् । ऋषिवत् । क्षत्रियवत् ॥

## उपसर्गाच्छन्दसि धात्वर्थे । (११८/३४०६)

उपसर्गात् [8]ससाधने धात्वर्थे वर्तमानात् स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये । 'यद्उद्वतो निवतो [9]यासि बप्सद्' (ऋ. १०.१४२.४) । उद्गतानि निगतानि च[10] (म.भा. २.३६५) ॥

## तस्य भावस्त्वतलौ । (११९/१७८१)

तस्य इति षष्ठीसमर्थाद् भावः इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः । भवतोऽस्मादभिधानप्रत्ययौ इति भावः । शब्दस्य प्रवृत्तिनिमित्तं भावशब्देनोच्यते । अश्वस्य भावः अश्वत्वम्, अश्वता । गोत्वम्, गोता ॥

## आ च त्वात् । (१२०/१७८२)

'ब्रह्मणस्त्वः' (५.१.१३६/१८०१) इति वक्ष्यति । [11]आ एतस्मात् त्वसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ । वक्ष्यति – 'पृथ्वादिभ्य इमनिज् वा' (५.१.१२२/१७८४) इति । प्रथिमा, पार्थवम्, पृथुत्वम्, पृथुता । म्रदिमा, मार्दवम्, मृदुत्वम्, मृदुता । अपवादैः सह समावेशार्थं वचनम् । कर्मणि च विधानार्थं 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५.१.१२४/१७८८) इति । चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । [12]स्त्रियाः भावः स्त्रैणम्, स्त्रीत्वम्, स्त्रीता । पुंसो भावः पुंस्त्वम्, पुंस्ता, पौंस्नम् ॥

## न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवट[13]बुधकतरसलसेभ्यः । (१२१/१७८३)

इत उत्तरे ये [14]भावप्रत्ययाः, ते नञ्पूर्वात् तत्पुरुषात् न भवन्ति चतुरादीन् वर्जयित्वा । वक्ष्यति – 'पत्यन्तपुरोहितादिभ्यो यक्' (५.१.१२८/१७९३) इति । अपतित्वम्, अपतिता । अपटुत्वम्, अपटुता । [15]अरमणीयत्वम्, अरमणीयता । नञ्पूर्वात् इति किम् ? [16]बार्हस्पत्यम् । प्राजापत्यम् । तत्पुरुषात् इति किम् ? नास्य पटवः सन्ति इति अपटुः, तस्य भावः आपटवम् । अचतुरादिभ्यः इति किम् ? आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । [18]आवटचम् । [19]आबुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् ॥

[17]आलघवम् ।

---

1. प्रासादाः ब. 2. अगारम् क. 3. देवदत्तस्य इव देवदत्तवत् यज्ञदत्तस्य क. 4. शुक्लाः इत्यधिकम् ह. 5. अर्हति ह. 6. पालनम् नास्ति फ. 7. ब्राह्मणवत् ऋषिवत् नास्ति फ. 8. साधारणे क. फ. 9. यासि वप्सत् नास्ति ह, वप्सत् नास्ति फ. 10. उद्गतान्निर्गतान् इत्यर्थः क. 11. आ—पृथुत्वम् नास्ति ड. 12. स्त्रियाः भावः नास्ति ड. 13. युध सि.कौ. 14. भाव नास्ति क.फ.ह. 15. अकमनीयत्वम् अकमनीयता क. 16. नास्ति क, गार्हस्पत्यम् ह, प्राजापत्यम् नास्ति ह. 17. आलघवम् नास्ति फ. 18. आघटचम् फ. 19 आबुध्यम् नास्ति ब.ड.फ.ह.